॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

૧૬. ષોડશઃ સર્ગઃ

સાધુભ્યો મધુમથનાંઘ્રિભક્તિભાગ્ભ્યઃ
શ્રૌતેભ્યો વિતતમતેર્મહાનુભાવમ ।
વેદાંતં સ્વયમિવ બંધમોક્ષમૂલં
વ્યાચષ્ટ સ્ફુટમથ કોઽપિ કોવિદોઽત્ર ॥ ૧૬.૧ ॥

ગોમત્યાસ્તટનિકટેઽચ્છકીર્તિચંદ્રં વિશ્વજ્ઞં ક્ષિતિપતિરંત્યવર્ણજન્મા ।
વિદ્વેષ્ટા શ્રુતિગુણસાધકં શ્રુતીનાં વાચાલો વચનમુવાચ વાગ્મિવર્યમ ॥
૧૬.૨ ॥

ઉન્મત્તપ્રલપિતવન્ન તદ્ધિ માનં યદ વાક્યં વ્યભિચરતિ ક્વચિત ફલેઽત્ર ।
દૃષ્ટાંતો ભવતિ તદપ્રમાણતાયાં સર્વેષાં શ્રુતિવચસાં ચ સર્વથેતિ ॥ ૧૬.૩
॥

વેદોક્તં ફલમલમાપ્યતેઽધિકારાદ ઈત્યુક્તોઽતનુમનસાઽભ્યધત્ત ધૂર્તઃ ।
યોગ્યત્વે સતિ ન હિ દૃશ્યતેઽધિકારી નાતઃ સ્યાત સ ખરવિષાણવત
સદેતિ ॥ ૧૬.૪ ॥

આક્ષેપં તમસહમાન ઉચ્ચમાનઃ સદ્યોઽસૌ નિજકરપલ્લવદ્વયેન ।
આદાય વ્યતનુત બીજમોષધીનાં સૂકતેનાંકુરદલપુશ્પબીજસૃષ્ટિમ ॥ ૧૬.૫ ॥

વ્યાખ્યાતા નિશિ સ કદાચન પ્રદીપે
સંશાંતે પુનરપિ વાચયાંબભૂવ ।
શિષ્યાન સ્વાન પુરુકરુણાંબુધિર્નિજાંઘ્રેઃ
અંગુષ્ઠસ્ફુટનખરાંતરોચિષૈવ ॥ ૧૬.૬ ॥

તીર્થાર્થં પૃથુતરવપ્રપાતિવારાં ધારાણાં રયસહનક્ષમાં મહેક્ષઃ ।
આનીતાં દશશતપુંભિરત્યશક્ત્યા પ્રેક્ષ્યોચે વિપુલશિલાં કવચિત સ મુકતામ ॥ ૧૬.૭ ॥

લોકાનામુપકૃતયે કુતઃ શિલેયં નિન્યે નો ઈતિ જનતા જગાદ તત્ર ।
નેતારો યતિવર માનવા ન હીમાં ભીમશ્ચેદિહ યતતે નયેન્ન વેતિ ॥ ૧૬.૮ ॥

નિન્યે તાં ગિરિમિવ વાનરીકૃતાત્મા લીલાવત્કરકમલેન સોઽમલેન ।
તત્રાપિ ન્યધિત તયાઽસ્ય સૂચ્યતેઽલં તત તુંગાં નનુ નિકષાઽધુનાઽપિ કર્મ ॥ ૧૬.૯ ॥

સંઘાતૈરધિકઘનૈરલંકૃતાધ્વા શિષ્યાણાં યતમનસામુતેતરેષામ ।
યત્રામા વસતિ તિથાવિનેન ચંદ્રઃ તત્રાસૌ સકલમતિઃ સસાર સિંધુમ ॥ ૧૬.૧૦ ॥

આર્દ્રાણ્ગાઃ સપદિ નિમજ્જનાત્સરસ્યાંકણ વસ્ય દ્વિજઋશભસ્ય વલ્લભાયામ ।
તત્રાઽયન ખરકિરણોપરાગહેતોઃ ગ્રામીણા અપિ સકલાઃ સબાલવૃદ્ધાઃ ॥ ૧૬.૧૧ ॥
સર્વજ્ઞં સપરિજનં સમીક્ષમાણાઃ
ફુલ્લાક્ષાઃ સ્મિતવદનાઃ શુભા નનંદુઃ ।
દૌર્મુખ્યં દધત ઉતાપરે નિનિંદુઃ
નાઽશ્ચર્યં દ્વયમપિ તત સ્વભાવતંત્રમ ॥ ૧૬.૧૨ ॥

મા મૈનં ભુવનગુરું વિનિંદતેત્થં
નિર્ભત્સ્ર્યાભ્યપતદિવોત્તરંગહસ્તઃ ।
સંક્ષોભી ઘનઘનઘોષઘોરવેષઃ
સંરંભી ખલદમનાય સિંધુરાજઃ ॥ ૧૬.૧૩ ॥

સમ્મોદાત્ત તરળતરો દ્રુતાભિગામી ગંભીરસ્વનનુતિમાન સુધેનહાસઃ ।
વીચ્યંગૈરધિકતરૈરિહાધિવેલં મધ્વાય પ્રણતિમિવ વ્યધાત સમુદ્રઃ ॥ ૧૬.૧૪ ॥

ગોલીલાસ્વતિશયિનાવગાધભાવાત ન્નોલ્લંઘ્યૌ વિવિધગુણપ્રકાશરત્નૌ ।
મધ્વાબ્ધી પરમમતેઃ પ્રિયં જનાનાં લાવણ્યં ન તુ જલધેરયં વિશેષઃ ॥ ૧૬.૧૫ ॥

અંભોધેસ્ત્વરિતતરોર્મિપાણિમૃષ્ટે સ્વચ્છેઽસૌ વિકટતટાસને નિષણ્ણઃ ।
વ્યાચખ્યાવતિચિરમૈતરેયશાખા સૂક્તાનિ પ્રભુરતિસુંદરપ્રકારમ ॥ ૧૬.૧૬ ॥

ગાંભીર્યાત સ્વનમધરીકરોતિ સિંધોઃ શ્રાવ્યત્વં વહતિ તથાઽપ્યહો
સ્વનોઽસ્ય ।
પૂર્ણેંદુપ્રભવદનઃ ક એષ ધન્યો મત્વેત્થં જનજલધિસ્તમાશુ પર્યૈત ॥
૧૬.૧૭ ॥

વેદાનાં સમુચિતભાવવાદદક્ષં યે વેદદ્વિષમિમમૂચિરે મહેર્ષ્યાઃ ।
ધિગ્ધિક તાનિતિ જનતા જગાદ તત્ર સ્વાશ્ચર્યાત કિલ કલિતાંજલિર્નમંતી ॥
૧૬.૧૮ ॥

સન્નામં વિપુલહ્રદે વિધાય ભક્ત્યા બિભ્રાણાશ્ચરણરજઃ સુરેંદ્રસેવ્યમ ।
તત્સ્નાનાદધિકશુચૌ નદાધિરાજે સસ્નુસ્તે દ્વિજનિકરાઃ પ્રશસ્તકાલે ॥
૧૬.૧૯ ॥

કલ્લોલૈઃ કરિનિકરૈરિવાનિવાર્યૈઃ ઉલ્લોલૈર્જન નિકરાન નિપાતયદ્ભિઃ ।
આક્રાંતાઃ પ્રબલતરૈશ્ચ લોઠયમાના હાસ્યત્વં પ્રયયુરુદન્વતીહ નૈકે ॥
૧૬.૨૦ ॥

મજ્જંતં પૃથુલહરીનિગૂઢમૂર્તિં સંપૂર્ણપ્રમતિમસજ્જનો જહાસ ।
યો લોકત્રયવિજયી ગુરુઃ પ્રસિદ્ધઃ સોઽયં હી પતતિ લઘૂર્મિલીલયેતિ ॥
૧૬.૨૧ ॥

નીચાનામવચ વચાંસ્ચજીગણન્નો દભ્રાણાં ક્ષુભિતકરાણ્ચદભ્રભોધઃ ।
ક્રોષ્ટૂનાં શ્વકલકલપ્રદં વિરાવં પંચાસ્ચો ન હિ ગણચેદુદારવીર્ચઃ ॥ ૧૬.૨૨ ॥

જન્મસ્થિત્ચવસિતિદાચિનં કટાક્ષં લોકાનામઘટચદંબુધૌ બૃહદ્ધીઃ ।
આક્રાંતોઽધિકગુરુણા સ તેન તાવત મુંચન સંચલનમભૂત્તટાકદેશ્ચઃ ॥ ૧૬.૨૩ ॥

ઈત્ચાદ્યૈરપિ ચરિતૈરનન્ચસાધ્ચૈઃ ન સ્થેષ્ઠાં બહુમતિમાપ દુર્જનોઽસ્મિન ।
વિદ્વેષં વ્ચધિત પુનર્નિરસ્તભાગ્ચે તસ્મિન દુર્મનસિ તદેવ શોભનં સ્ચાત ॥ ૧૬.૨૪ ॥

સંપ્રાપ્તં સહ સહજેન ગંડવાટં સ્વોજસ્સંપ્રકટન આદિશદ્વિશંકમ ।
શુશ્રૂષામચમુચિતો વિધાતુમીષત લોકાનામિતિ વચસા પરીક્ષકાણામ ॥ ૧૬.૨૫ ॥

શ્રીકાંતેશ્વરસદનેઽનચત કિલૈકો ચસ્ત્રિંશન્નરવરનીતકેતુચષ્ટિમ ।
આહત્ચા ગુરુગદચૈવ નાળિકેરાદ ચો લેભે તરળતરાત ફલાનિ કામમ ॥ ૧૬.૨૬ ॥

એતાદૃગ્બલવિભવઃ સ તસ્ચ કંઠં
તજ્જ્યેષ્ઠોઽપ્ચભિત ઉભૌ સમં ગૃહીત્વા ।

નિષ્પેષ્ટું પરમમવાપતુઃ પ્રયત્નં
સંઘર્ષાત ક્રમપરિવર્ધમાનતૈક્ષ્ણ્યમ ॥ ૧૬.૨૭ ॥

આસ્વિન્નાવલસતરૌ ગુરોર્નિયોગાત છત્રાગ્ર્યનિલમહિતૌ ચ તાવુભાભ્યામ ।
મુક્ત્વાઽયઃકઠિનતરત્વચં શિરોધિં પર્યાયસ્ફુટવચનાં નિપેતતુઃ કૌ ॥
૧૬.૨૮ ॥

આશ્વસ્તૌ શુચિહૃદિમાવનૂનમાનૌ ઉદ્ધર્તું સમગદદંગુલિં ધરાસ્થામ ।
સંગૃહ્ય પ્રસભરસાદપિ પ્રયત્તૌ સામર્થ્યં યયતુરિમૌ ન કંપનેઽસ્યાઃ ॥
૧૬.૨૯ ॥

નિર્યત્નં વટુમધિરુહ્ય મંદહાસી સ પ્રાયાદિહ પરિતો નૃસિંહગેહમ ।
ઐશ્વર્યૈરિતિ લઘિમાદિકૈરુપેતો મધ્વોઽભૂત ત્રિભુવનચિત્રરત્નરાજઃ ॥
૧૬.૩૦ ॥

પંચાશન્નરપનરોપનીતમાત્રાં યો વાર્ક્ષીં ગૃહમધિરોહિણીં નિનાય ।
સ વ્યાખ્યાસ્વરદમનાય પૂર્વવાટો નિર્દેશાદ વ્યધિત ગુરોર્ગળ પ્રપેષમ ॥
૧૬.૩૧ ॥

સ્વિન્નેઽસ્મિન્નપિ યતમાન આગ્રહોગ્રે પ્રાચ્ચાત તત્પ્રવચનનિસ્વનોઽતિરેજે ।
ઉદ્ધર્તું વિપુલહૃદંગુલીં ચ નાલં સોઽભૂદિત્યજનિ કુતૂહલં જનાનામ ॥
૧૬.૩૨ ॥

www.yoga.com

પર્યૈક્ષિ પ્રભુરિતરૈઃ શિવાગ્નિપૂર્વૈઃ નોપૈક્ષિ પ્રબલતરૈસ્તથા પ્રયત્નૈઃ ।
નાવૈક્ષિ કવચિદપિ શકત્યપૂર્તિરસ્મિન ઉત્પ્રૈક્ષિ સ્વયમપિ ભીમ
ઈત્યવશ્યમ ॥ ૧૬.૩૩ ॥

લેખિન્યાં મુહુરપિનહ્ય કૃષ્યમાણં નાપ્યેકં તનુરુહમસ્ય તૂદપાટ ।
નાસાગ્રે મૃદુનિ કૃતૈશ્ચ મુષ્ટિઘાતૈઃ નાસ્યેંદોરતિબલિભિઃ પ્રસક્ષતાડડસિ ॥
૧૬.૩૪ ॥

પંચાસ્યઃ શ્વભિરિવ હી વિહીનસારૈઃ અંભોધિર્નગ સરિતાં જલૈરિવાલ્પૈઃ ।
હ્યોતૈરિવ તરણિર્વિડંબયન નૂન પ્રત્યર્થિસ્વસમનરૈર્વ્યવાહરત સઃ ॥
૧૬.૩૫ ॥

પારંતીસુરસદનં વિશાલસંવિત સંપ્રાપ્તઃ ખલુ સુચિરાન્નિવેદ્યહીનમ ।
ગ્રામ્યાગ્ર્યક્ષિતિપતિભિર્દિનાર્ધમાત્રાત તદ્ભૂતીર્વ્યધિત સભૂત બલ્યનલ્પાઃ ॥
૧૬.૩૬ ॥

ભીમત્વે સહ સહજૈઃ પ્રતિષ્ઠિતઃ પ્રાક પંચાત્મા મુરરિપુરંચિતો યદત્ર ।
પાંચાલ્યા બલિસલિલં સમં દદત્યા સોઽસ્માર્ષીત તમિમમથ
પ્રપૂજ્યપૂજ્યઃ ॥ ૧૬.૩૭ ॥

આયાસ્યન કિલ સરિદંતરાખ્યદેશં ગ્રીષ્મે નિર્જલમિહ શુશ્રુવાંસ્તટાકમ ।
તત્કાલે પરમભિવર્ષયન ઘનૌઘં તત્પૂર્ત્યૈ વ્યધિત કુતૂહલં જનાનામ ॥
૧૬.૩૮ ॥

દુર્મંત્રૈઃ ખલપટલૈઃ પ્રચોદ્યમાનો ગ્રામેશો વૃશળપતિઃ પ્રહર્તુમેનમ ।
સંપ્રાપ્તસ્તત ઉત ચાંતમીક્ષમાણઃ પ્રોદ્યંતં રવિમિવ વિસ્મિતો નનામ
।૧૬.૩૯ ॥

ક્ષેત્રાગ્ર્યં ત્રિભુવનવૈદ્યનાથનાથં પ્રસ્થાય પ્રચુરતરાંતરઃ પ્રભાવી ।
શ્રીકૃષ્ણામૃતપરમાર્ણવાભિધાનાં ચક્રે સદ્વચનતતિં સ્વભક્તભૂત્યૈ ॥ ૧૬.૪૦
॥

સ ગ્રામં પરમપિ ચાત ઉચ્ચભૂતિં વિદ્વાંસઃ ક્વ કુહરકૂપદર્દુરાભાઃ ।
ઈત્યૂચે મદમતિમાનિનોઽખિલજ્ઞમ મન્યસ્ય ક્ષપયિતુમેવ તજ્જનસ્ય ॥
૧૬.૪૧ ॥

સર્વ જ્ઞોઽપ્યયમધિકં ન યજ્ઞભંગીં સંવિત્તે યતિરિતિ બદ્ધનિશ્ચયોઽસૌ ।
આભાંતં પરિષદિ મત્સરાદપૃચ્છત કર્માર્થશ્રુતિગહનાર્થખંડભાવમ ॥ ૧૬.૪૨
॥

છંદોભ્યશ્ચ્યુતરસસંગ્રહપ્રવીણાન ષષ્ઠેઽહ્નિ પ્રતિવિહિતાન પ્રજાધિપેન ।
નારાશંસ્યચરમચારુમંત્રભેદાન ઊચેઽસૌ તમભિદધદ વિસંશયાંશઃ ॥
૧૬.૪૩ ॥

પાંડિત્યં પરમમવેત્ય તસ્ય તાદૃક સંઘર્ષત ક્ષુભિતમના વિપક્ષસંઘઃ ।
નાર્થઃ સ્યાદયમિતિ વર્ણયન્નથ ત્વં તં બ્રૂહીત્યુરુમતિનેરિતોઽદ્રવદ દ્રાક ॥

૧૬.૪૪ ॥

સોઽપૃચ્છત તમથ મહાહ્યોપસર્ગા યત્રોક્તા મનુચરણોપસૃજ્યરૂપાઃ ।
તસ્યાર્થં વચનચયસ્ય તં બ્રુવાણઃ સ્થૈર્યાર્થં સપદિ સ લેખયાં બભૂવ ॥
૧૬.૪૫ ॥

સંપૂર્ણં શશિનમિવોદિતં કૃશઃ ષ્વા
ચક્ષોભાશુભનિકરો નિરીક્ષ્ય મધ્વમ ।
પ્રત્યર્થી સ્વયમિતિ દૂરવોઽભિધાવન
કિં તેન ક્ષતમમૃતાકરસ્ય તસ્ય ॥ ૧૬.૪૬ ॥

નિસ્સ્વાનાં કતિપયભુક્તિયુક્તભક્તં
ભક્તાનાં વ્યધિત ચતુર્ગુણં દયાલુઃ ।
ભુંક્તે સ્મ ત્રિદશનરોપભોગ્યમન્નં
સંપ્રીત્યૈ સ ધનવતાં બૃહત્પ્રબોધઃ ॥ ૧૬.૪૭ ॥

વૃષ્ટયાદેઃ સ નિયમનાદિ ચક્ર એતત
ચિત્રં કિં ભુવનનિયામકે સમીરે ।
અપ્યેવં ભુવનગુરોઃ કૃતાનુવાદઃ
કૃત્યેષુ પ્રવર ઈતીહ વર્ણયામઃ ॥ ૧૬.૪૮ ॥

ઈત્યૂચે ધરણિસુરેણ કેવલં નો
માધ્વીયં વિવિધકથા કથાસુ માન્યા ।

સાક્ષાદપ્યમરવરૈરુદીર્યમાણા
ગંધર્વૈર્દ્યુસદસિ તન્મુદે જગેઽસૌ ॥ ૧૬.૪૯ ॥

તાં પદ્યપ્રણિગદિતાં તુ મૂર્છયિત્વા
તાનાનામુચિતતયાઽઽત્તપંચમાદ્યાઃ ।
ગાંધારં દ્યુવિષયમુજ્જ્વલં સૃજંતો
ગ્રામં તે પ્રજગુરકાકિકમ્રકંઠાઃ ॥ ૧૬.૫૦ ॥

આનમ્રૈઃ સુમુકુટમૌલિભિઃ કરાગ્રૈઃ
આતામ્રૈઃ પ્રતિકલિતૈઃ સ્મિતૈર્મુખાબ્જૈઃ ।
આશ્રાવિ સ્થિરતરભક્તિભિઃ સુરેંદ્રૈઃ
તદ્ગીતા દશધિષણાર્ચવર્યચર્યા ॥ ૧૬.૫૧ ॥

ગીર્વાણૈર્વિજયમહોત્સવસ્ય પૂજાં
કુર્વાણૈરવિરળસંવિદસ્તદાનીમ ।
વિસ્મેરૈર્મુનિનિકરોપદેવચુકતૈઃ
સુસ્મેરૈરથ તમવેક્ષિતું પ્રજગ્મે ॥ ૧૬.૫૨ ॥

આદર્શં ગુણગણદર્શને મુરારેઃ
સચ્છાસ્ત્રં રચિતમનેન વર્ણયંતઃ ।
પ્રદ્યોતૈરુડુપદવીં પ્રકાશયંતઃ
પ્રૈક્ષંત પ્રચુરમનોવિલાસમેતે ॥ ૧૬.૫૩ ॥

www.yousigma.com

નાકીંદ્રાસ્તમવનિભાગમાવસંતં
સુશ્લોકૈરપિ ભુવનાનિ ભૂષયંતમ ।
નેમુઃ ખાદુપનિષદં તદૈતરેયીં
વ્યાખ્યાંતં વિવિધવિષિષ્ટશિષ્યમધ્યે ॥ ૧૬.૫૪ ॥

શ્રીમંતં શશિવદનં કુશેશયાક્ષં
ગંભીરસ્વરમતિદિવ્યલક્ષણાઢ્યમ ।
પશ્યંતઃ સ્વગુરુમથાર્ચિયન કૃતાર્થા
વાણ્યા તં હરિરતિપૂર્ણકામમેતે ॥ ૧૬.૫૫ ॥

અહરો દુરાગમતમઃ સ્વગોગણૈઃ
અકરોર્મુકુંદગુણવૃંદદર્શનમ ।
અજયશ્ચતુર્દશ જગંતિ સદ્ગુણૈઃ
શરણં ગુરો કરુણયાઽપિ નો ભવેઃ ॥ ૧૬.૫૬ ॥

નમસ્તે પ્રાણેશ પ્રણતવિભવાયાવનિમગા
નમઃ સ્વામિન રામપ્રિયતમ હનૂમન ગુરુગુણ ।
નમસ્તુભ્યં ભીમ પ્રબલતમ કૃષ્ણેષ્ટ ભગવન
નમઃ શ્રીમન મધ્વ પ્રદિશ સુદૃશં નો જય જય ॥ ૧૬.૫૭ ॥

ઈતિ નિગદિતવંતસ્તત્ર વૃંદારકેંદ્રા
ગુરુવિજયમહં તં લાળયંતો મહાંતમ ।
વવૃષુરખિલદૃશ્યં પુષ્પવારં સુગંધં

હરિદયિતવરિષ્ઠે શ્રીમદાનંદતીર્થે ॥ ૧૬.૫૮ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે ષોડશઃ સર્ગઃ ॥
॥ સમાપ્તોયં ગ્રંથઃ ભારતીરમણ મુખ્યપ્રાણંતર્ગત
શ્રી કૃષ્ણાર્પણમસ્તુ ॥

www.yousigma.com